दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-4 ■ वर्ष-3 ■ अङ्क-66

1

30.12.2023 शनिवासरः वि.सं. २०८० पौषकृष्णः चतुर्थी पौषः 15 प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

जिला शिक्षा एवं प्रशिक्षणसंस्थाने चम्बायां हिमाचलप्रदेशस्य ६० संस्कृतशिक्षकाणां प्रचलति प्रशिक्षणम् 2



मुख्यसचिवानां त्रिदिवसीयसम्मेलनस्य नवदिल्ल्यां प्रधानमन्त्रिणः नेतृत्वे उपवेशनम् 3



महाभारत कथा अथ उद्योग पर्वः पाण्डवानां वनवासस्य समाप्तिः युद्धस्य सज्जता च 4



## प्रधानमन्त्री नरेन्द्र-मोदी अयोध्यायाम् अद्य विकास- परियोजनानाम् उद्घाटनं विधास्यति, आधारशिलां च संस्थापयिष्यति



प्रधानमन्त्री नरेन्द्रमोदी अद्य अयोध्यां यास्यति। सः पुनर्विकसितस्य अयोध्या-रेलस्थानकस्य अयोध्या-धाम-जंक्शन रेलवे-स्टेशन-इत्यस्य उद्घाटनं करिष्यति। अमृतभारतं रेलयानम् वन्देभारतं रेलयानं च हरितध्वजं दर्शयिष्यति। सममेव प्रधानमन्त्री अन्यासाम् रेल-परियोजनानामपि लोकार्पणं विधास्यति। रेलमन्त्री अश्विनी-वैष्णवः अपि अयोध्याधाम-रेलस्थानके समायोजित- समारोहे उपस्थितः भविष्यति। प्रधानमन्त्री अयोध्यायाम् एकां जनसभामपि सम्बोधयिष्यति, यत्र सः सप्तशताधिक- पञ्चसहस्र- कोटितोप्यधिक-रूप्यकाणां विकासपरियोजनानां उद्घाटनं विधास्यति, आधारशिलां च संस्थापयिष्यति। एतासु परियोजनासु अयोध्यायाः समीपवर्ति क्षेत्राणां विकासाय शताधिक- एकादशसहस्रकोटि-रूप्यकाणां परियोजनाः समेत्य षोडशत्तोत्तर चतुःसहस्र- कोट्यात्मिकाः अन्य- परियोजनाः सम्मिलिताः सन्ति।

## क्रीडामन्त्री अनुरागसिंहठाकुरः - रजतपदकविजेत्रीं ग्राण्डमास्टरकोनेरुहम्पी चतुरङ्ग क्रीडायाः राज्ञी



युवसन्दर्भस्य क्रीडामन्त्री अनुरागसिंहठाकुरः उज्बेकिस्तानस्य समरकण्डनगरे विंशतिः त्रयोविंशतिः तमस्य वर्षस्य विश्वमहिलारैपिड प्रतियोगितायां रजतपदकविजेत्रीं ग्राण्डमास्टरकोनेरुहम्पी इत्यस्याः अभिनन्दनं कृतवान्। चतुरङ्ग क्रीडायाः राज्ञी इति नाम्ना सम्बोधयता ठाकुरेण उक्तं यत् तस्याः यात्रा धैर्यम् एकाग्रतां च समेत्य प्रतिभा कौशलयोः परीचायिकास्ति। ठाकुरमहोदयेन उक्तं यत् कोनेरू हम्पिना भारतीयक्रीडासु चतुरङ्ग क्रीडा महत्वपूर्णस्थाने उपस्थापिता। कोनेरु हम्पी इत्यनया द्वादशोत्तर द्वि सहस्रतमे वर्षे मास्कोनगरे आयोजितासु स्पर्धासु कांस्यपदकं प्राप्तम् आसीत्। ऊनविंशत्यधिक द्विसहस्रतमे वर्षे सा विश्वविजेतृ जाता। उज्बेकिस्तानस्य समरकण्डनगरे विंशतिः त्रयोविंशति वर्षस्य विश्वरैपिड्-ब्लिट्ज् इति प्रतियोगिता प्रचलति । ह्यः ब्लिट्ज आयोजनस्य समाप्तिः अभवत् ।

## केन्द्रसकाशात् पञ्च-उच्चन्यायालयानां

### मुख्यन्यायाधीशत्वेन नियुक्त्यर्थं न्यायाधीशानां नाम्नाम् अभ्यर्थना




सर्वोच्च न्यायालय कॉलेजियम इत्यनेन केन्द्रसकाशात् पञ्च-उच्चन्यायालयानां मुख्यन्यायाधीशत्वेन नियुक्त्यर्थं न्यायाधीशानां नाम्नाम् अभ्यर्थना विहिता। एतेषां नियुक्तिः राजस्थान-पंजाब-हरियाणा-गुवाहाटी-इलाहाबाद-झारखण्डस्थितेषु उच्चन्यायालयेषु भविष्यति। राजस्थान- उच्चन्यायालयस्य मुख्यन्यायाधीशत्वेन न्यायमूर्तिः मणिन्द्रमोहन श्रीवास्तवः, पंजाब-हरियाणा उच्चन्यायालयोः न्यायमूर्तिः शील नागू, गुवाहाटी उच्चन्यायालयस्य कृते विजय बिष्णोई, इलाहाबाद उच्चन्यायालये अरुण भंसाली, झारखण्ड-उच्चन्यायलयं मुख्यन्यायाधीशत्वेन बी. आर. सारंगी इत्येतेषां नामानि प्रेषितानि। भारतस्य मुख्यन्यायाधीशः डी.वाई. चन्द्रचूडः सर्वोच्यन्यायालयस्य कॉलेजियम इत्यस्य अध्यक्षः एवञ्च न्यायमर्तिः संजीव-खन्ना एवं बी. आर. गबई इत्येतौ सदस्यौ स्तः।

## दहरा-वैश्विकप्रकरणे अष्ट-भारतीयानां

### कतरदेशे अष्टभारतीयानां मृत्युदण्डः न्यूनीकृतः



दहरा-वैश्विकप्रकरणे अष्ट-भारतीयानां मृत्युदण्डम् कतरस्य न्यायालयेन न्यूनीकृतम्। कतरदेशे अष्टभारतीयानां मृत्युदण्डः न्यूनीकृतः अस्ति। विदेशमन्त्रालयेन विज्ञप्तौ उक्तं यत् कतरस्य अध्यर्थनया न्यायालयेन निम्नन्यायालयस्य निर्णये परिवर्तनं कृत्वा दहरा वैश्विकप्रकरणे दण्डः न्यूनीकृतः। मन्त्रालयेन उक्तं यत् निर्णयस्य विवरणं प्रतीक्षितम्। भारतीय नौसेनायाः अष्ट-पूर्वकर्मचारिभ्यः कतरन्यायालयेन मृत्युदण्डः प्रदत्तः। अद्य सायं दिल्ल्यां वार्ताहरान् सम्बोधयता विदेश मन्त्रालयस्य प्रवक्त्रा अरिन्दम-बागची-इत्यनेन उक्तं यत् भारतीयानां तेषां परिवार-जनानां हितमेव सर्वकारस्य महति चिन्तास्ति। विमानं चतुर्दिनानां कृते फ्रांसदेशे अवरोधितमासीत्।

## भारतीय-अन्तरिक्ष-अनुसन्धान-संघटनेन भूसम्बद्ध-सूचनाः संकलयितुं पंचाशत्-उपग्रहाणां प्रवर्तनार्थं योजना निर्मीयते



भारतीय-अन्तरिक्ष-अनुसन्धान-संघटनेन भूसम्बद्ध-सूचनाः संकलयितुं आगामि-पंचवर्षेषु पंचाशत्-उपग्रहाणां प्रवर्तनार्थं योजना निर्मीयते। भारतीय- प्रौद्योगिक-संस्थानं बाम्बे इत्यनेन आयोजिते वार्षिक-विज्ञान-प्रौद्योगिकी-कार्यक्रमे प्रवदता इसरो अध्यक्षेण सोमनाथेन कथितं यत् अनेन सैनिकानां गमनागमनं बीक्षितुं क्षमतायाः विकासो भविष्यति। सोमनाथेन कथितं यत् दृढ़राष्ट्रस्य निर्माणदिशि उपग्रहाणां संख्या अपर्याप्तास्ति, एतदपेक्षया अस्माकं पार्श्वे दशगुणाधिकाः उपग्रहाः भवेयुः। तेन इदमपि प्रोक्तं यत् एतेषु पर्याप्तरूपेण परिष्कारः अपि भवितव्यम्।

## प्रासङ्गिकवार्ता

- प्रधानमन्त्रिणः नरेन्द्रमोदीवर्यस्य अध्यक्षतायां मुख्यसचिवानां राष्ट्रियसम्मेलनस्य समापनम्।
- प्रधानमन्त्री नरेन्द्रमोदी अद्य अयोध्यानगरे १५,७०० कोटिरूप्यकाणां विकासपरियोजनानां प्रारम्भं करिष्यति।
- स्थानिकगुप्तचरसङ्ग्रहार्थम् आगामिषु पञ्चवर्षेषु ५० उपग्रहान् प्रेषयितुं देशस्य लक्ष्यम्- इसरो प्रमुखः एस. सोमनाथः।
- श्री मातावैष्णोदेवी विश्वविद्यालयस्य नवमः दीक्षांतसमारोहः सम्पन्नम्। दीक्षांतसमारोहस्य मुख्यातिथिः केन्द्रीयशिक्षामन्त्री धर्मेन्द्रप्रधानः आसीत्।
- असमराज्यस्य संयुक्तमुक्तिमोर्चा (ULFA) इत्यस्य संगठनस्य केन्द्र-असमसर्वकारयोः मध्ये त्रिपक्षीयशान्तिज्ञापने हस्ताक्षरम् जातम्।
- लद्दाखे एकोनत्रिंशत्मार्गपरियोजनानां कृते सर्वकारेण सहमतिः ज्ञापिता।
- दहरा-वैश्विकप्रकरणे अष्ट-भारतीयानां कतरदेशे अष्टभारतीयानां मृत्युदण्डः न्यूनीकृतः
- भारतीय-अन्तरिक्ष-अनुसन्धान-संघटनेन भूसम्बद्ध-सूचनाः संकलयितुं पंचाशत्-उपग्रहाणां प्रवर्तनार्थं योजना निर्मीयते
- शिमलाम् आगत्य अवदत् मुख्यमन्त्री सुक्खुः- न्यायालयस्य आदेशं पठित्वा पुलिसमहानिदेशकस्य प्रकरणे भविष्यति निर्णयः
- जिला शिक्षा एवं प्रशिक्षणसंस्थाने चम्बायां हिमाचलप्रदेशस्य ६० संस्कृतशिक्षकाणां प्रचलति प्रशिक्षणम्। प्रशिक्षणस्य तृतीये दिवसे पाठ्यपुस्तकाधारितानां गद्यपद्यात्मकानां पाठानां पाठनविधिनां विषये प्रशिक्षणम्

## सुभाषितम्

**गुणी गुणं वेत्ति न वेत्ति निर्गुणो बली**
**बलं वेत्ति न वेत्ति निर्बलः ।**
**पिको वसन्तस्य गुणं न वायसः**
**करी च सिंहस्य बलं न मूषकः ॥**

**भावार्थ – गुणी पुरुष ही दूसरे के गुण पहचानता है, गुणहीन पुरुष नही। बलवान पुरुष ही दूसरे का बल जानता है, बलहीन नही। वसन्त ऋतु आए तो उसे कोयल पहचानती है, कौआ नही। शेर के बल को हाथी पहचानता है, चूहा नही।**

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

# जिला शिक्षा एवं प्रशिक्षणसंस्थाने चम्बायां

## हिमाचलप्रदेशस्य ६० संस्कृतशिक्षकाणां प्रचलति प्रशिक्षणम्



**हिमसंस्कृतवार्ताः- चम्बा।**
समग्रशिक्षाहिमाचलप्रदेशः संस्कृतशिक्षकाणां कृते राज्यस्तरीय- प्रशिक्षणकार्यशालायाः आयोजनं चम्बाजनपदस्य जिलाशिक्षाप्रशिक्षणसंस्थाने सरु इत्यत्र कुर्वन् अस्ति। एतत् प्रशिक्षकप्रशिक्षणं 27/12/2023 तः 31/12/2023 पर्यन्तं आयोजितम् अस्ति। अस्मिन् सम्पूर्ण हिमाचलस्य ६० सर्वकारीयसंस्कृतशिक्षकाः भागं गृह्णन्ति। अस्मिन् पञ्चदिवसीयप्रशिक्षणे घटमानानां कार्याणां विषये बोधयन् डॉ. मनोजशैलः अवदत् यत् संस्कृतविषयसम्बद्धाम् आधुनिकस्थित्यानुसारं शिक्षकान् सज्जीकर्तुं समग्रशिक्षाहिमाचलस्य एषः प्रशंसनीयः उपक्रमः अस्ति। अस्मिन् शिक्षकान् शिक्षानीतिः, राष्ट्रिय उपलब्धिसर्वेक्षणक्षेत्रवारसमस्याः तेषां सम्भाव्यसमाधानं च तथा च आधुनिकसाधनानाम् उपयोगेन छात्राणां कृते स्वविषयं प्रभावीरूपेण प्रसारयितुं विविधाः पद्धतयः प्रशिक्षिताः सन्ति। अस्यां कार्यशालायां डॉ. शिवकुमारः राज्यसंसाधनव्यक्तिरूपेण शिक्षानीति २०२०, व्यावहारिकसंस्कृतं, मूल्याङ्कनविषयेषु चर्चां कृतवान्, ललितशर्मा उच्चमाध्यमिकस्तरस्य शिक्षाशास्त्रीयप्रक्रियाः, पठनकौशलं, उच्चमाध्यमिकस्तरस्य साहित्यिकसामग्रीप्रयोगः, डॉ. अमनदीपः सरलमानकसंस्कृतं, संस्कृतसम्भाषणम्, काव्यपाठविधिः, अध्यापनक्षेत्रे प्रौद्योगिक्याः प्रयोगः, डॉ. अमित शर्मा, लेखनकौशलविषये, डॉ मनोजशैलः संस्कृतशिक्षणे मूल्याङ्कनम्, डॉ देवर्षि अगस्त्यः प्रथमद्वितीयतृतीयभाषारूपेण संस्कृतं, नाटकशिक्षणं, व्याकरणशिक्षणस्य प्रायोगिकं ज्ञानं डॉ कमलकांतः भाषणकौशलम्, गद्यपाठनम् व्याकरणपाठस्य प्रविधयः एतेषु विषयेषु सत्रं गृहीतम्। प्रशिक्षणं प्राप्तुं ये शिक्षकाः आगताः ते अपि उत्साहेन भागं गृहीतवन्तः। अध्यापनसामग्रीणां व्यावहारिकपक्षं प्रतिदिनं विविधक्रियाभिः सुदृढं भवति स्म । श्रव्य-दृश्य-सामग्रीणां उपयोगेन पाठ्यक्रमं कथं छात्राणां कृते विविधरीत्या सुलभं कर्तुं शक्यते इति प्रयोगात्मकपद्धत्या प्रशिक्षणं दत्तम्। मनोजशैलेन एतत्प्रकारस्य प्रशिक्षणस्य कृते। राज्यपरियोजनानिदेशकस्य राजेशशर्मणः एवं राज्यप्रशिक्षणसमन्वयिकायाः सोनियाशर्मामहोदयायाः, जिला- परियोजना-अधिकारिणः सुमनकुमारमिन्हासस्य अपि च जिलाशिक्षकप्रशिक्षणप्रमुखस्य ओंकारवर्मणः आभारः प्रकटितः।
संयोजकः जिलाशिक्षक-प्रशिक्षणप्रमुखः ओंकारवर्मा अस्यै कार्यशालायै राज्य समग्रशिक्षाहिमाचलप्रदेशस्य आभारं प्रकटितवान्। सः अवदत् यत् चम्बायां एतादृशी प्रथमा कार्यशाला आयोजिता यत्र राज्यस्य सर्वेभ्यः जनपदेभ्यः शिक्षकाः समागताः सन्ति। चर्चासु सर्वे भागं गृह्णन्ति, एतादृशं वातावरणं कार्यशालायाः दृष्ट्या महत्त्वपूर्णं भवति, संस्थायाः छात्राणां कृते अपि प्रेरणादायकं वर्तते। सम्पूर्णा कार्यशाला संस्कृतमाध्यमेन संस्कृतशिक्षकैः संचालितं कृतम् अस्ति। यस्य प्रारम्भिकसत्रे संस्कृतप्रार्थनाः, संस्कृतभाषायां वार्ता इत्यादयः पठ्यन्ते।

# शिमलाम् आगत्य अवदत् मुख्यमन्त्री सुक्खुः- न्यायालयस्य आदेशं पठित्वा पुलिसमहानिदेशकस्य प्रकरणे भविष्यति निर्णयः



**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।**
मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः न्यायालयस्य आदेशं पठित्वा पुलिसमहानिदेशकस्य प्रकरणे निर्णयः भविष्यति इति उक्तवान्। शुक्रवासरे नवदेहलीतः राजधानी शिमलानगरं प्रत्यागत्य मीडियाभिः सह वार्तालापं कुर्वन् मुख्यमन्त्री अवदत् यत् यदा अस्मिन् विषये उच्चन्यायालयस्य आदेशः आसीत् तदा अहं राज्यात् बहिः आसम्। अहं न्यायालयस्य आदेशं पठितुं न शक्तवान्। इदानीं आदेशान् पठिष्यामि, विस्तृतविमर्शानन्तरं शीघ्रमेव अग्रे निर्णयः क्रियते।
मुख्यमन्त्री उक्तवान् यत् काङ्ग्रेसपक्षः लोकसभानिर्वाचने निष्ठायुक्तानां प्रत्याशीनां चयनं करिष्यति। प्रत्याशिनां जनाधारं च करिष्यति। अधुना नवदेहल्यां काङ्ग्रेस- शीर्षनेतृत्वेन सह अनेके विषयाः विस्तरेण चर्चा कृताः। लोकसभानिर्वाचने के के विषयाः भविष्यन्ति इति विषये विचारविमर्शः कृतः।
सः अवदत् यत् शीर्षनेतृत्वेन एतादृशः आदेशः दत्तः यत् यस्य नेता निर्वाचने विजयस्य क्षमता अस्ति सः एव दलस्य प्रत्याशी करणीयः। समागमे अभ्यर्थीनां चयनविषये विस्तृतविमर्शः अभवत्। मुख्यमन्त्री उक्तवान् यत् शीघ्रमेव नवनियुक्तानां मन्त्रिमण्डलमन्त्रिणां विभागाः आवंटिताः भविष्यन्ति। अपरपक्षे मन्त्रिमण्डलमन्त्रिणः अनिरुद्धसिंहः यादवेन्द्रगोमा च मुख्यमन्त्रिणा सह नूतनदिल्लीतः शिमलानगरं प्रत्यागतवन्तौ ।

# पर्यटकानां स्वागताय सज्जः हिमाचलप्रदेशः



मुख्यमन्त्री उक्तवान् यत् हिमाचलप्रदेशः नूतनवर्षस्य स्वागताय पूर्णतया सज्जः अस्ति। पर्यटकाः अस्माकं अतिथयः सन्ति। राज्यस्य प्रत्येकस्मिन् क्षेत्रे पर्यटकाः अतिथिरूपेण व्यवहारं कर्तुं प्रार्थिताः सन्ति। पर्यटकाः कस्यापि समस्यायाः सम्मुखीकरणं कर्तुं न शक्नुवन्ति। सुचारु यातायातव्यवस्थां निर्वाहयितुम् आहूता अस्ति।

# कलहं जनयतु शासनं करोतु इति काङ्ग्रेसस्य आनुवांशिके गुणे अन्यतमः - अनुरागठाकुरः



**हिमसंस्कृतवार्ताः- कार्यालयीयः** यदा यदा काङ्ग्रेसदलं पराजयं प्राप्नोति तदा-तदा कलहं जनयतु शासनं करोतु च इति रणनीतिं स्वीकर्तुं प्रयतते। काङ्ग्रेसदलं कदाचित् जातिगणनायाः विषये कथयति, कदाचित् क्षेत्रवादस्य विषये च वदति। परन्तु सा कदापि विकासस्य विषये न वदति। देशं अग्रे नेतुम् इति चर्चाभ्यः काङ्ग्रेसः सर्वदा पलायते। केन्द्रीयमन्त्री अनुरागठाकुरः बिलासपुरस्य भ्रमणकाले झण्डुताक्षेत्रे एवम् उक्तवान्। झंडुत्ताविधानसभायां एवं बलघाड़स्य बेहनाब्राह्मणायां "विकसितभारतं संकल्पयात्रायाः" कार्यक्रमेषु केंद्रीयसूचनाप्रसारणम् एवं युवाक्रीडामंत्री अनुरागसिंहठाकुरः भागं स्वीकृतवान्।तदनन्तरं झण्डुतायां स्थिते भाजपाकार्यालये क्षेत्रप्रभारीभिः सह सभा कृता। विकसितभारतसंकल्पयात्रायाः अन्तर्गतं अनुरागठाकुरः केन्द्रसर्वकारस्य योजनानां लाभार्थिनः सम्बोधयन् २०४७ तमवर्षपर्यन्तं विकसितभारतस्य निर्माणार्थं प्रधानमन्त्रिणः संकल्पं पुनः उक्तवान्। मीडिया सह वार्तालापं कुर्वन् सः अवदत् यत् प्रथमवारं केन्द्रसर्वकारस्य जनकल्याणयोजनाः देशस्य अन्तिमपुरुषस्य द्वारे नेतुम् कार्यं प्रधानमन्त्री नीतवान्।
अधुना यावत् विभिन्नराज्येषु लक्षशः जनाः अस्याः यात्रायाः माध्यमेन सर्वकारीययोजनानां लाभं प्राप्तवन्तः। अस्माद् कारणात् जागरूकता निरन्तरं वर्धमाना अस्ति, जनानां लाभः अपि प्राप्यते। अस्याः यात्रायाः माध्यमेन देशस्य प्रत्येकं कोणे जनाः सर्वकारीययोजनानां विषये अवगताः क्रियन्ते।काङ्ग्रेससम्बद्धस्य राजनैतिकप्रश्नस्य उत्तरे अनुराग ठाकुरः अवदत् यत् यदा कदापि काङ्ग्रेसपक्षस्य हानिः भवति तदा सा विभाज्य शासनं च इति रणनीतिं स्वीकर्तुं प्रयतते। काङ्ग्रेसदलं कदाचित् जातिगणनायाः विषये वदति, कदाचित् क्षेत्रवादस्य विषये वदति परन्तु विकासस्य विषये कदापि न वदति। भारतगठबन्धनस्य विषये खननं कृत्वा सः अवदत् यत् एते जनाः परस्परं न्यायं कर्तुं न समर्थाः सन्ति। आसनेषु समन्वयः नास्ति।

# मुख्यसचिवानां त्रिदिवसीयसम्मेलनस्य नवदिल्ल्यां प्रधानमन्त्रिणः नेतृत्वे उपवेशनम्



मुख्यसचिवानां त्रिदिवसीय सम्मेलनं नवदिल्ल्यां जायमानमस्ति। प्रधानमन्त्री नरेन्द्रमोदी अस्य सम्मेलनस्य अन्तिमोपवेशनस्य अध्यक्षतां कृतवान्। मुख्यसचिवानां इदं तृतीयं सम्मेलनं वर्तते। प्रथमं सम्मेलनं 'द्वाविंशत्यधिक-द्विसहस्रतम-वर्षस्य जूनमासे धर्मशालायां समभवत् सहैव द्वितीयं सम्मेलनं अस्य वर्षस्य जनवरीमासे दिल्ल्यां अभवत्। सम्मेलनस्यास्य आयोजनं सहकारी संघवादस्य सिद्धान्तान् व्यवहारे आचरितुं प्रकल्पितमस्ति। प्रधानमन्त्रिणः परिकल्पनानुरूपं राज्यकेन्द्रसर्वकारयोः मध्ये सहभागितां वर्धयितुं सम्मेलनमिदं विहितम्।
केन्द्रसर्वकारस्य प्रतिनिधयः, राज्यानां केन्द्रशासित प्रदेशानां मुख्यसचिवाः अन्ये च वरिष्ठाधिकारिणः समेत्य द्विशतादधिकाः प्रतिनिधयः अस्मिन् सम्मेलने भागं भजन्ते।

अस्य सम्मेलनस्य उद्देश्यं तावत् सर्वकारीयतन्त्रं दृढीकृत्य ग्रामीण-नगरीय-जनानां जीवनं परिष्कर्तुं कार्याचरणं इति वर्तते। अस्मिन् सम्मेलने जनकल्याणकारी योजनानां अनायासेन वितरणं सहैव गुणवत्तापूर्णसेवानां विशेषरूपेण प्रदानार्थं बलं प्रदास्यते। एतदतिरिच्य साइबर सुरक्षा, आर्टिफिशियल इंटेलिजेंस, पुनर्वासः, अमृतसरोवरः पीएम-स्वनिधियोजना इत्यादिषु विषयेष्वपि विचार-विमर्शं करिष्यते।

# दिनद्वयं यावत् उत्तरभारतीय राज्येषु कुज्झटिकायाः स्थितिः तीव्रा भविष्यति



नवदिल्ल्यां शुक्रवासरे प्रातः राजधान्यां एनसीआरक्षेत्रे च प्रगाढ़कुज्झटिकायाः स्थितिः समापतिता। अनेन उड्डयने रेलपरिचालने च बाधाः समुत्पन्नाः। उत्तररेलवे-इत्यस्यानुसारं कुज्झटिकाकारणात् एकादश-रेलयानानि दिल्ल्यां विलम्बेन आगतानि। आई.जी.आई. विमानपत्तने एतस्य स्थितौ परिष्काराः संदृष्टाः। भारतीय-ऋतुविज्ञान-विभागेन अधिकतम तापमानं एकविंशतिः डिग्री सहैव न्यूनतमं तापमानं दशदशमलव चत्वारि डिग्री यावत् समंकितम्। ऋतु-विज्ञान-विभागेन प्रोदीरितं यत् आगामि-दिनद्वयं यावत् उत्तरभारतीय राज्येषु कुज्झटिकायाः स्थितिः तीव्रा भविष्यति।

# उग्रसङ्गठनम् उल्फा इत्यनेन ४० वर्षाणामनन्तरं शस्त्राणि स्थापितानि; शाहस्य उपस्थितौ शान्तिसन्धौ हस्ताक्षरितम्




गृहमन्त्री अमितशाहस्य उपस्थितौ उग्रवादीसङ्गठनस्य संयुक्तमुक्तिमोर्चा आसोम (उल्फा), असमसर्वकारस्य केन्द्रयोः मध्ये शान्तिसन्धौ हस्ताक्षरं कृतम्। अस्य श्रेयः उल्फा-प्रतिनिधिभ्यः दत्त्वा गृहमन्त्री अवदत् यत् एतत् केवलं तेषां प्रयत्नात् एव सम्भवम् इति। अस्यां सन्धौ सर्वे पक्षाः कालनिर्धारितरूपेण सम्पन्नाः भविष्यन्ति इति सः अवदत्। अस्मिन् काले ७०० उल्फा-कर्मचारिणः अपि आत्मसमर्पणं कृतवन्तः । अस्मिन् अवसरे असमस्य मुख्यमन्त्री हिमन्तविश्वसर्मा अपि उपस्थितः आसीत् इति वदामः। विगत १२ वर्षेभ्यः केन्द्रसर्वकारः अरबिण्डाराजखोवा इत्यस्याः नेतृत्वे समूहेन सह वार्तालापं कुर्वन् आसीत् । भवद्भ्यः वदामः यत् उग्रवादीसङ्गठनस्य उल्फा इत्यस्य एकः गुटः अद्यापि अस्य शान्तिसन्धौ भागः नास्ति। अस्य शिरः परेश बरुआ । उल्फा-सङ्घस्य अस्य समूहस्य २० नेतारः गतसप्ताहं यावत् दिल्लीनगरे आसन् । अनुप चेतिया गुटः उल्फा इत्यस्य समूहः अस्ति । एतदेव अस्मिन् सम्झौते समाविष्टम् अस्ति । परन्तु भारतसर्वकारस्य कृते एषा महती सफलता, अतिवादस्य समाप्त्यर्थं च महत् सोपानम् इति कथ्यते। २०११ तः एषा संस्था शस्त्राणि न गृहीतवती । परन्तु एषा शान्तिसन्धिः एतां प्रतिबद्धतां सुदृढां करोति ।विशेषज्ञानाम् मते अस्यां सन्धौ उक्तं यत् असमदेशस्य जनानां सांस्कृतिकविरासतां रक्षिता भविष्यति। एतदतिरिक्तं असम-जनानाम् आजीविकायाः व्यवस्था भविष्यति। ये जनाः उल्फा-संस्थायां संलग्नाः आसन्, तेषां कृते अपि वृत्तयः भविष्यति । सशस्त्र-आन्दोलनं त्यक्तवन्तः उल्फा-सदस्याः मुख्यधारायां आनेतुं सर्वकारः सहकार्यं करिष्यति। उल्लेखनीयं यत् उल्फा असमदेशे सक्रियः उग्रवादीसङ्गठनः अस्ति । अस्य गठनं १९७९ तमे वर्षे एप्रिलमासस्य ७ दिनाङ्के परेशबरुआहेन सहभागिभिः अरबिन्दराजखोवा, अनूपचेतिया च सह अभवत् । असम-राज्यं स्वायत्तं सार्वभौमं च राज्यं करणीयम् इति अस्य उद्देश्यम् आसीत् । एषा संस्था शस्त्राणि गृहीतवती । १९९० तमे वर्षे केन्द्रसर्वकारेण तस्य प्रतिबन्धः कृतः आसीत् । १९९१ तमे वर्षे अस्य संस्थायाः प्रायः नवसहस्राणि जनाः आत्मसमर्पणं कृतवन्तः । राजखोवा अपि २००८ तमे वर्षे गृहीतः आसीत् । राजखोवा यदा शान्तिसन्धिं प्रति अगच्छत् तदा संस्था द्विपक्षे विभक्तवती ।

# लद्दाखे एकोनत्रिंशत् मार्गपरियोजनानां कृते सर्वकारेण सहमतिः ज्ञापिता



सर्वकारेण लद्दाखे एकोनत्रिंशत् मार्गपरियोजनानां कृते सहमतिः ज्ञापिता। सप्तत्यधिकैकशतोत्तर- एकसहस्र- कोटि- रूप्यतोऽप्यधिक- परियोजनाभिः मार्गाणां राजमार्गाणाञ्च विकासो भविष्यति। केन्द्रिय- मार्ग-परिवहन एवं राजमार्ग मन्त्री नितिन-गडकरी प्रोक्तवान् यत् एतदतिरिच्य प्रायशः द्व्यशीत्यधिकैकशत- कोटि-रूप्यकाणि निधियोजनान्तर्गतं अष्टसेतूनां निर्माणार्थं आवंटितानि सन्ति। तेनोदीरितं यत् अनेन लद्दाखस्य सम्पर्कः दूरवर्ती-ग्रामीणक्षेत्रैः सह सम्यक् भविष्यति। तेनोदीरितं यत् अनेन केन्द्रशासितप्रदेशस्य समग्रविकासः सुनिश्चितो भविष्यति।

# हरियाणा-पञ्जाबयोः कृते मेलिष्यतः अद्य द्वे वन्दे-भारत-रेलयानद्वयम् , दिल्लीतः अष्टघण्टासु कटरा, सार्धपञ्चघण्टासु अमृतसरं प्राप्तुं शक्यते



प्रधानमन्त्री नरेन्द्रमोदी शनिवासरे अयोध्यानगरे नूतनरेलस्थानकस्य उद्घाटनं करिष्यति तथा च अमृतभारतद्वयं वंदेभारतस्य षट् रेलयानानेभ्यः हरितध्वजं दर्शयति। एतेषु वन्देभारतस्य रेलयानद्वयं हरियाणा-पञ्जाबयोः कृते मेलिष्यतः । एतेषु एकं रेलयानं नवीदिल्लीरेलस्थानकात् हरियाणा-पञ्जाबमार्गेण जम्मू-कश्मीरस्य माँवैष्णोदेवीकटरास्थानकं प्रति प्रस्थास्यति। अमृतसर-पुरातनदिल्ली-रेलस्थानकयोः मध्ये द्वितीयं वन्देभारत-रेलयानं प्रचलति । एतयोः द्वयोः रेलयानयोः अम्बाला कैण्ट् रेलस्थानके प्रत्येकं द्वौ निमेषौ यावत् विश्रामः भविष्यति । अमृतसर-पुरातनदिल्ली-रेलस्थानकयोः मध्ये प्रचलते वंदेभारत-रेलयाने अष्टौ कोचः (५३० आसनानि) भविष्यन्ति, नूतनदिल्ली-कटरास्थानयोर्मध्ये प्रचलते वन्देभारत-रेलयाने १६ कोच (११३८ आसनानि) भविष्यन्ति एतयोः रेलयानयोः सह अम्बाला रेलविभागे वन्देभारतरेलयानानां संख्या चतुर्णां यावत् वर्धते। अम्बाला विभागस्य डीआरएम मन्दीप भाटिया इत्यनेन उक्तं यत् ३० दिसम्बर् दिनाङ्के प्रथमदिने अम्बाला कैन्ट् स्थानकद्वयोः रेलयानयोः स्वागतं भविष्यति। एतेषां अतिरिक्तं प्रधानमन्त्रिणा नरेन्द्रमोदिना ध्वजं दर्शयिष्यमाणायाः नूतनायाः अमृतभारतस्य रेलयानस्य २२ कोचाः भविष्यन्ति। एतेषां रेलयानानां परिचालनमपि जनवरीमासस्य प्रथमसप्ताहपर्यन्तं आरभ्यते इति सम्भावना वर्तते। अमृतसर-पुरातन-दिल्लयोः मध्ये प्रचलिते वन्दे-भारत-रेलयाने (रेल-सङ्ख्या २२४८८) सार्धपञ्च-घण्टासु सम्पूर्णं यात्रां व्याप्नुयात् । इयं रेलयानानां प्रातः सार्ध-अष्टवादने अमृतसरात् प्रस्थाय अपराह्ने १.५० वादने पुरातनदिल्ली-स्थानकं प्राप्स्यति । प्रतिफलरूपेण एतत् रेलयानं पुरातनदिल्लीस्थानकात् अपराह्ने ३.१५ वादने अमृतसरं प्रति प्रस्थास्यति, तथैव नवदिल्लीतः प्रचलिते वंदेभारतरेलयानं (रेलसंख्या २२४७८) अष्टघण्टासु कटरानगरं प्राप्स्यति। इयं रेलयानं कटरारेलस्थानकात् प्रातः ६ वादने प्रस्थास्यति, प्रातः ११.४४ वादने अम्बाला कैन्ट्-नगरं गमिष्यति ।

दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

# महाभारत कथा

## अथ उद्योग पर्वः पाण्डवानां वनवासस्य समाप्तिः युद्धस्य सज्जता च





हिमसंस्कृतवार्ताः
✍दिलीपः,संस्कृतशिक्षकः
शिक्षाविभागः हि.प्र.

पाण्डवानां वनवासः समाप्तः। इदानीं ते कौरवेभ्यः प्रतिशोधं ग्रहीतुं सज्जाः आसन्।अभिमन्युः उत्तरायाः च विवाहे बहवः राजानः उपस्थिताः आसन्। श्रीकृष्णस्य आज्ञानुसारं विराटनरेशस्य सभायां आमन्त्रितानां सर्वेषां राज्ञाम् एका सभा आहूता। श्रीकृष्णः सर्वेभ्यः नृपेभ्यः कौरवानां अन्यायस्य कथां कथयन् पृष्टवान् यत् पाण्डवाः स्वराज्यं प्राप्तुं प्रयत्नं करिष्यन्ति वा अत्याचारं वा निरन्तरं सहनं करिष्यन्ति। राजा द्रुपदः पाण्डवानां समर्थनं कृतवान् परं बलरामः तु तेषां विरोधं कृतवान्। सर्वेषां सम्मत्या दुर्योधनं प्रति दूतं प्रेषयितुं निर्णयः अभवत्।

पाण्डवाः युद्धस्य सज्जतां कर्तुम् आरब्धवन्तः। पाण्डवाः पाञ्चाल-विराटसेनाभिः सह कुरुक्षेत्रस्य समीपे शिबिरं कृतवान्। कौरवाः एतत् ज्ञात्वा तेषां विजयाय नानाराज्ञाम् आमन्त्रणानि अपि प्रेषयितुम् आरब्धवन्तः। दुर्योधनः अर्जुनः च स्वयमेव यादवानां स्व-स्व पक्षे कर्तुं अगच्छताम्। यदा तौ सहायतार्थं श्रीकृष्णस्य शय्यागृहं प्राप्तवन्तौ तदा सः सुप्तः आसीत्। अर्जुनः कृष्णस्य चरणयोः उपविष्टः दुर्योधनश्च कृष्णस्य शिरपक्षे गत्वा उपविष्टः। यदा कृष्णः नेत्रे उद्घाटिते तदा सः प्रथमेव अर्जुनं दृष्टवान् ततः दुर्योधनम्। उभौ एव युद्धाय सहायता याचित्वन्तौ। यथा दुर्योधनः याचितः तथैव कृष्णः स्वस्य नारायणीसेना दुर्योधनाय दत्त्वा स्वयमेव इदं कथितं यत् "अहम् अर्जुनस्य पक्षे एव तिष्ठामि" इति प्रतिज्ञां कृतवान्। अपि च "युद्धे अहं शस्त्राणि न ग्रहिष्यामि" इति प्रतिज्ञां कृतवान्। पाण्डवानां मातुलः शल्यः पाण्डवानां साहाय्यतार्थं प्रस्थितवान्। दुर्योधनः मार्गे तस्य स्वागतव्यवस्था कृता तत् दृष्ट्वा शल्यः अतीव प्रसन्नः अभवत्, तस्य सुखस्य प्रतिदानरूपेण दुर्योधनः तं निज पार्श्वे नीतवान्। कुरुक्षेत्रे सः पाण्डवान् अवदत् यत् सः कौरवैः सह गन्तुं प्रतिबद्धः अस्ति। युधिष्ठिरः शल्यं प्रार्थितवान् यत् यदि सः कर्णस्य सारथिः भवेत् तर्हि सः सर्वदा तं निरुत्साहं करिष्यति इति। शल्यः एतत् आग्रहं स्वीकृतवान्।

युद्धस्य स्थितिं दूरीकर्तुं पाण्डवैः एकः दूतः शान्तिसंदेशेन सह दुर्योधनं पार्श्वे प्रेषितः परन्तु दुर्योधनः शान्तिप्रस्तावम् आनयन्तं दूतं प्रतिवर्त्य प्रेषितवान् कथितवान् च यत्- "अहं युद्धं विना सूचिकामुखमात्रभूमिमपि न दास्यामि इति"। युधिष्ठिरस्य परामर्शेण श्रीकृष्णः पुनः शान्तिप्रस्तावः कृत्वा दुर्योधनं पुरतः प्रेषितः यत्- "पाण्डवाः केवलं पञ्चग्रामैः एव तृप्ताः भविष्यन्ति तावन्तमेव ददातु न इतोऽधिकम् इति" परन्तु दुर्योधनस्य उत्तरं तादृशमेव आसीत्। अतः युद्धस्य स्थितिः पूर्णरूपेण निर्मिता एव जाता।

# राष्ट्रसेवापराङ्मुखः




नामरी भारती येन ,मुहुर्मुहुः प्रपीयते ।
वर्तते तादृशो लोको, राष्ट्रसेवापराङ्मुखः।।१।।
तनोति गीर्विवादं यो, देवभाषापथे सदा।
नीचोऽयमस्ति दुर्बुद्धी , राष्ट्रसेवापराङ्मुखः।।२।।
पुष्णाति भारते यो हि, बहीराष्ट्रजसंस्कृतिम्।
सोऽस्ति नीचःकुधीर्दुष्टो, राष्ट्रसेवापराङ्मुखः।।३।।
दूरदर्शनकं वीक्ष्य, भारतीं संस्कृतिञ्च यः।
दूषयति खलस्सोऽपि राष्ट्रसेवापराङ्मुखः।।४।।
भक्ष्ये भोज्ये च पेये च , करोति मिश्रणं सदा।
किन्नायं वर्तते दुष्टो, राष्ट्रसेवापराङ्मुखः।।५।।
सामिनग्रनिजां बालां , रुप्यकप्राप्तिहेतवे।
नर्तयत्युच्चमञ्चेऽसौ राष्ट्रसेवापराङ्मुखः।।६।।
व्यर्थार्थहीनशिक्षां यो, शालायां प्रददात्यहो!।
भवति तादृशो धूर्तो राष्ट्रसेवापराङ्मुखः।।७।।
करोति कर्म सोत्कोचं , जनानां सततञ्च यः।
तादृशःकुटिलोऽज्ञानी, राष्ट्रसेवापराङ्मुखः।।८।।
विज्ञानजान्धभक्त्या यो, रोगार्णवे निमज्जति।
किन्नास्ति तादृशो लोको, राष्ट्रसेवापराङ्मुखः।।९।।
नाथावतीर्य गोत्रायां, तूर्णं त्रायस्व सद्रणम्।
भविष्यत्यन्यथैषोऽपि ,राष्ट्रसेवापराङ्मुखः।।१०।।

हिमसंस्कृतवार्ताः
महेशनारायणशास्त्री
(संस्कृताध्यापकः)
कुरेडा,टोङ्क, राजस्थानम्



# श्रीगुरु गोविन्दसिंहः



शास्त्रे एवं शस्त्रे परमनिपुणस्य गुरु गोविन्दसिंहस्य नाम को वा न जानीयात्? गुरोर्जन्म माता गुजरी, पिता च नवमगुरुः तेगबहादुरः इति अनयोः औरसे विक्रमी सम्वत्- १७२३ तमवर्षस्य पौषशुक्ल- सप्तमीतिथौ, शनिवासरे, पटनायां सञ्जातमासीत्। पूर्वजन्मनि कठोरतपोनिष्ठः सः 'भारतं गत्वा धर्मप्रचारं कुर्याद्' इति दैविकादेशं प्राप्तवान् आसीत्। अत एव तस्य भारते जन्म। यदा सः नववर्षीयः आसीत् तदा तस्य पिता देहल्यां शहीदः अभवत्। तस्मात् सः आनन्दपुरे गुरुपदं समलङ्कृतवान्। विक्रमी सम्वति १७३४ तमवर्षे सः जीतो देवीं परिणीतवान्। कालक्रमे तस्य चत्वारः पुत्राः अजायन्त। ते चत्वारः हि धर्मरक्षार्थम् आत्मबलिदानेन प्रसिद्धतां गताः। बहुव्ययेन संस्कृतग्रन्थस्य अनुवादं कारितवान्। सिक्खसेनां निर्माय दुर्गं सज्जीकृतवान्। तेन गुरुणा १ वैशाख, १७५६ सं० इति दिनाङ्के 'खालसा' सम्प्रदायः संस्थापितः। सिक्खस्य दृढजाति-निर्माणाय आसीदयं प्रयासः। एकदा औरङ्गजेबस्य महती मुगलसेना आक्रमणाय आनन्दपुरं समागता। घोरयुद्धं प्रवृत्तम्। अनेन महती हानिः अभवत्, बहवः ग्रन्थाः नष्टाः। गुरुमाता, द्वौ पुत्रौ च ततः च्यविताः, ते सरहिंदं सम्प्राप्तवन्तः। तत्र द्वौ लघुपुत्रौ नानायातनया पीडितौ। स्वयं गुरुदेवः शत्रुसेनया आवृतः, द्वौ ज्येष्ठपुत्रौ च मारितौ। महतीं वीरतां प्रदर्श्य गुरुः सेनावरणतः कथञ्चित् बहिर्निर्गतवानासीत्। ततः सः मरुदेशं वनादिषु च अटितुम् आरब्धवान्। ततः औरङ्गजेबस्य सकाशे एकं पत्रं प्रेषितवान्। यच्च 'जफरनामा' इति नाम्ना ज्ञायते। एतत् पत्रं प्राप्य बादशाहः अत्यन्तं लज्जितः अभवत्। औरङ्गजेबस्य मृत्योरनन्तरं गुरोः साहाय्येन बहादुरशाहः बादशाहः अभवत्। गुरुगोविन्दसिंहः पुनः दक्षिणयात्राम् आरब्धवान्। तत्र गोदावरीतीरे तेन अविचलनगरं स्थापितम्। कार्तिकशुक्लपक्षे पञ्चमीतिथौ गुरुवासरे, गुरुणा सैनिकवेशं धृत्वा शस्त्रं स्वीकृतवान्। ततः सः सिक्खजनान् आदिशत् यत् 'इतः परं ग्रन्थसाहबः हि गुरुः भविष्यति' इति। एवमुक्त्वा अश्वम् आरुह्य ४२ वर्षीयः सः सहसा अन्तर्धानः अभूत्। नामकीर्तनविषये गुरुः गोविन्दसिंहः अकथयत्-



'देश-बिदेस नरेसन जीत,
अनेक बडे अवनेस संहारे।
आठोइ सिद्धि सबै नव निद्धि,
समृद्धिन सर्व भरे गृहसारे।।
चन्द्रमुखी बनिता बहुतै धरि,
मालभरे नहिं जात सम्हारे।
नामबिहीन अधीन भये जम,
अंत को नागे हि पाइं सिधारे।।' इति शुभम्।

✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# मनमोहनसिंहः




पूर्वम् आङ्ग्लशासितपञ्जाबप्रान्ते गाह इत्यत्र (साम्प्रतं पाकिस्तानमध्ये चतवाल् जनपदे) सिक्खखत्री परिवारे १९३२ तमे वर्षे २६ सप्टेम्बरदिनाङ्के गुरुमुखसिंह -अमृतकौरदम्पत्योः श्री मनमोहनसिंहः जातः .[२]। यदा सः अल्पायुरासीत् तदैव मात्रा वियुक्तः अभवत्। पितामह्या पोषितः ।अतः सः तस्याः अतीव निकटवर्ती आसीत् । भारतदेशस्य विभाजनस्य पश्चात् तस्य परिवारः भारते अमृतसरं प्रति स्थानान्तरितः अभवत् । तत्र सः हिन्दुमहाविद्यालये अपठत् । सः चण्डीगढस्थितं पञ्जाबविश्वविद्यालयं प्रविश्य अर्थशास्त्रमधीतवान्। तथैव क्रमेण १९५२, तथा १९५४ मध्ये स्नातकपदवीं स्नातकोत्तरपदवीं च प्राप्नोत् । तस्य विद्यार्जनकाले सः सदैव सर्वप्रथमः आसीत् । अनन्तरम् अर्थशास्त्रस्य ट्रायपास- अभ्यासक्रमं पठितुं सेण्ट्-जान्-महाविद्यालयं प्राविशत् । १९५५ तः१९५७ वर्षपर्यन्तं कृतस्य विशेषयोग्यतासम्पादनस्य निमित्तम् सः राइट्स् पुरस्कारं प्राप्तवान् । तथैव रेनबरीछात्रवृत्तेः ये कतिपयाः एव प्रतिग्राहकाः(स्वीकर्तारः) आसन् तेषु सः अन्यतमः अभवत् । आक्सफर्डविश्वविद्यालयस्य नफील्ड् महाविद्यालयस्य सः सदस्यः आसीत् । तेन तत्कृते प्रस्तुतस्य शोधप्रबन्धस्य शीर्षकम् एवम् आसीत् -"१९५१-६० कालावधौ भारतस्य निर्यातनिष्पादनम् -निर्यातप्रत्याशाः-नीति-विवक्षाः च। (India's export performance, 1951-960, export prospects and policy implications .) । डा. IMD Little (आ एम् डी लिटल्) तस्य प्रबन्धस्य अधीक्षकः आसीत् । अनन्तरम् अयमेव प्रबन्धः 'भारतस्य निर्यातप्रवृत्तयः -स्वसंवार्धितवृद्धये प्रत्याशाः च' इति नाम्ना पुस्तकत्वेन प्रकाशितः । १९९७ मध्ये अलबर्टाविश्वविद्यालयेन सः विधिज्ञानविषये गौरवडाक्टरेट्-पदव्या सम्मानितः । जुलै २००५ मध्ये आक्सफर्डविश्वविद्यालयः तस्मै व्यवहारविधिज्ञानविषये गौरवडाक्टरेट्-पदव्या सम्मानितः ।